**अन** जीवने अदा०पर० अक०सेट्। अनिति आनीत्। घञ् आनः, अच् अनः, ल्युट् अननम्। आनयति अनिनिषति। क्विप् अन् "सर्वं खल्विदं ब्रह्म तज्जलानिति विश्वे च-नेदना च्छा० ४ ३०,३, अना प्राणेनेति भा० छा०उप० "यद्येष आकाश आनन्दो न स्यात् कोह्येवान्यात्? कः प्राण्यात्? इति श्रुतिः "प्राणिवस्तव मानार्थमिति" भट्टिः। प्राद्युपसर्गतोविशेषगत्यर्थता। प्र+प्राग्गतौ, प्राणः अप+अधोगतौ अपानः, उद्+ऊर्द्ध्वगतौ उदानः, वि+आ+विष्वग्गतौ व्यानः, सम्+समन्ताद्गतौ समानः। "यद्वै प्राणिति स प्राणः यदपानिति सोऽपानः" इति श्रुतिः। जीवनं च प्राणधारणं तेन धात्वर्थन्तर्हीतकर्मकत्वादकर्मकः यस्य संयोगात् देहनिर्म्माणमित्युक्तमधिष्ठानशब्दे। उपसर्गनिमित्तात् हलन्तत्वेऽप्यस्य णत्वं प्राण्।

**अन** जीवने दिवा० आत्म०अक० सेट्। अन्यते आनिष्ट।

**अन** पु० आ+नी—बा०ड पृ० आङो ह्रस्वः अन—बा० अच् वा। आनयने प्राणने च "प्राणोऽपानो व्यान उदानः समानोऽन इत्येतत् सर्वं प्राण इति" बृ०उप०। "अथ प्राण उच्यते। प्राणो मुखनासिकासञ्चार्याहृदयवृत्तिः। प्रणयनात् प्राणः। अपनयनान्मूत्रपुरीषादेरपानोऽधोवृत्तिः आ-नाभिस्थानः। व्यानो व्यानयनकर्मा, व्यानः प्राणापानयोः सन्धिर्वीर्य्यवत्कर्म्महेतुश्च। उदान उत्कर्षोर्द्ध्वगमनादिहेतुरा-पादतलमस्तकस्थान ऊर्द्ध्ववृत्तिः। समानः समं नयनाद्भुक्तस्य पीतस्य च कोष्ठस्थानोऽन्नपक्ता। अन इत्येषां वृत्तिविशेषाणां सामान्यभूता सामान्यदेहचेष्टासम्बन्धिनी वृत्तिरेवं यथोक्तं प्राणादिवृत्तिजातमेतत् सर्वं प्राण एवेति" भा०। प्राणे च "स होवाच किं मेऽन्नं भविष्यतीति" यत्किञ्चिदिदमा श्वभ्य आ शकुनिभ्य इति होचुस्तद्वा एतदनस्यान्नमनो ह वै नाम प्रत्यक्षमिति छा०उ० "स होवाच मुख्यः प्राणः, किं मेऽन्नं भविष्यतीति" मुख्यप्राणं प्रष्टारमिव कल्पयित्वा वागादीन् प्रतिवक्तॄनिव कल्पयन्ती श्रुतिराह। यदिदं लोकेऽन्नजातं सर्वप्रसिद्धमा श्वभ्य आ श्वभिः सह, आ शकुनिभ्यः सह शकु-निभिः सर्वं प्राणिनां यदन्नं तत्तवान्नमिति होचुर्वागादय इति। प्राणस्य सर्वमन्नं प्राणोऽत्ता सर्वस्यान्नस्येत्येवं प्रतिपत्तये कल्पिताख्यायिकारूपाद्व्याख्यत्वेन श्रुतिरूपेणाह। तद्वै एत-द्यत्किञ्चिल्लोके प्राणिभिरन्नमद्यते अनस्य प्राणस्य तदन्नम् भा०

**अनंश** त्रि० नास्ति अंशोदायग्रहणाधिकारोऽस्य। अंशानधि-कारिणि क्लूयुक्ते क्लीवपतितादौ। ते च "सर्व्वे हि धर्म्मयुक्ता भागिनो द्रव्यमर्हन्ति यस्त्वधर्म्मेण द्रव्याणि प्रतिपादयति ज्येष्ठोऽपि तमभागं कुर्वीतेति" आप०। "सवर्णाजोऽप्यगुणवा-न्नार्हः स्यात् पैतृके धने। तत्पिण्डदाः श्रोत्रिया ये तेषां तदभिधीयते। उत्तमर्णाधमर्णेभ्यः पितरं त्रायते सुतः। अतस्तद्विपरीतेन नास्ति तेन प्रयोजनम्। तया गवा किं क्रियते या न धेनुर्न गर्भिणी। कोऽर्थः पुत्रेण जातेन यो न विद्वान् न धार्म्मिकः। शास्त्र-शौर्य्यार्थरहितस्तपोविज्ञानवर्जितः। आचारहीनः पुत्रस्तु मूत्रोच्चारसमस्तु स इति बृह० "आह्लादेः पुत्रकर्तृकतया महाफलश्रुतेस्तत्कर्म्मवेतनं धनसम्बन्धित्वं अतस्तदकुर्व्वतः कुतो वेतन? मिति दा०भा०। अतएवाह मनुः। "सर्व-एव विकर्म्मस्था नार्हन्ति भ्रातरो धनम्"। तथा "अनंशौ क्लीवपतितौ जात्यन्धबधिरौ तथा। उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः इति। "पतितस्तत्सुतः क्लीवः पङ्गुरुन्म-त्तको जडः। अन्धोऽचिकित्स्यरोगार्त्तौ भर्त्तव्यास्ते निरं-शकाः" इति कात्या०। देवलः "मृते पितरि न क्लीवकुष्ठ्युन्म-त्तजडान्धकाः। पतितः पतितापत्यं लिङ्गी दायांशभागिनः। तेषां पतितवर्ज्जेभ्यो भक्तवस्त्रं प्रदीयते। तत्सुताः पितृ-दायांशं लभेरन् दोषवर्ज्जिताः" इति। बौधायनः। "अतीतव्यवहारान् ग्रासाच्छादनैर्बिभृयुः, अन्धजडक्लीव-व्यसनिव्याधितादींश्चाकर्म्मिणः पतिततज्जातवर्जम् इति"। "पितृद्विट् पतितः पण्डो यश्च स्यादौपपातिकः। औरसा अपि नैतेऽंशं लभेरन् क्षेत्रजाः कुतः?। इति" नार० "अक्रमोढासुतस्यैव सगोत्राद्यस्तु जायते। प्रव्रज्यावसितस्यैव न रिक्थं तेषु चार्हति। अक्रमोढा-सुतस्त्वृक्थी सवर्णश्च यदा पितुः। असवर्णप्रसूतश्च क्रमोढायाश्च यो भवेत्। प्रतिलोमप्रसूतोयस्तस्याः पुत्रो न रिक्थभाक्। ग्रासाच्छादनमात्रं तु देयं तद्बन्धुभिर्मतम् बन्धूनामप्यभावे तु पितृंश्च द्रव्यं तदाप्नुयात्। स्वपितृ-तद्धनं प्राप्तं दापनीया न बान्धवा इति कात्या०। एवं दर्शिताः। अंशः अवयवः। तच्छून्ये निरवयवे आका-शादौ, परमेश्वरे च। [यस्याः। कदल्याम् जटाधरः।

**अनंशुमत्फला** स्त्री न अंशुमत् मोचकाभ्यन्तरस्थत्वात् फलं

**अनक** पु० अणकवत्। अधमे, कुत्सिते च।

**अनक्ष** त्रि० न अक्ष्णोति व्याप्नोति विषयमिन्द्रियेण अक्ष—क्विप् न०त०। अन्धे चक्षुरिन्द्रियशून्ये। "प्रतिश्रोणः स्था व्यन-गचष्टेति" ऋ०२, १५, ७, "पूर्व्वमन्धः अधुना चक्षुर्ला-भात् व्यचष्टेति भा०।

**अनक्ष** त्रि० नास्ति अक्षं चक्रं नेत्रादिकमिन्द्रियं वा यस्य ब०।